इति भाषा। (ऊर्द्धतलम्। यथा,
"उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये"।
इति कुमारे ३।४५। तथा, याज्ञवल्क्यः।
"पिण्डपात्रं तदुत्तानं कृत्वा विप्रान् विसर्ज्जयेत्"।
"उत्तानं लेपनाभ्यङ्गपरिषेकावगाहनैः।
वरेकास्थापनैः स्नेहपानैर्गम्भीरमाचरेत्"॥
इति चिकित्सास्थाने द्वाविंशेऽध्याये वाभटेनोक्तं॥
"उत्तानस्य प्रसुप्तस्य कांस्यं वा ताम्रभाजनम्।
नाभौ निधाय धाराम्बु शीतदाहनिवारणम्"॥
इति हारीते चिकित्सितस्थाने द्वितीयोऽध्यायः॥)

उत्तानकः, पुं, (उत्+तन+ण्वुल्।) उच्चटावृक्षम्। इति रत्नमाला॥ (उच्चटाशब्देऽस्य विशेष उक्तः॥)

उत्तानपत्रकः, पुं, (उत्तानं ऊर्द्धमुखं पत्रं यस्य। बहुव्रीहौ स्वार्थे कन्।) रक्तैरण्डवृक्षः। इति राजनिर्घण्टः॥

उत्तानपादः, पुं, (उत्तानः उन्नतः पादः पदं यस्य।) राजविशेषः। स तु स्वायम्भुवमनुपुत्त्रः इति पुराणम्॥ (यथा, विष्णुपुराणे १।११॥
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु।
द्वौ पुत्त्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव"॥)

उत्तानपादजः, पुं, (उत्तानपादात् जायते यः। उत्तानपाद+जन्+ड।) उत्तानपादराजपुत्त्रः। तत्पर्य्यायः। ज्योतीरथः २ ग्रहाधारः३ ध्रुवः ४। इति हारावली॥ (उत्तमः। यथा, विष्णुपुराणे १।११॥
"तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः।
अभीष्टायामभूद्ब्रह्मन्! पितुरत्यन्तवल्लभः॥२॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज!
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः॥३॥)

उत्तानशयः, त्रि, (उत्तानः शेते। शीङ् शयने पार्श्वादिषूपसंख्यानमिति अच्।) अत्यन्तशिशुः। तत्पर्य्यायः। डिम्भा २ स्तनपा ३ स्तनन्धयी ४। इत्यमरः॥ उत्तानसुप्तः॥

उत्तापः, पुं, (उत्+तप्+घञ्।) तेजः। उष्मा। सन्तापः॥ (यथा, हितोपदेशे।
"प्रत्यहः सर्व्वसिद्धीनामुत्तापः प्रथमः किल"॥)

उत्तारः, त्रि, (उत्+तॄ+घञ्।) महान्। तत्पर्य्यायः। उदीर्णः २ उद्भटः ३ उदारः ४ उत्तमः ५। इति जटाधरः॥ (यथा प्रबोधचन्द्रोदये।
"संसारसागरोत्तारतरणिः"।) वमनम्। इति प्रायश्चित्तविवेकादयः॥

उत्तारी, [न्] त्रि, (उत्+तॄ+णिन्।) चपलः। इति भूरिप्रयोगः॥

उत्तालः, त्रि, (उत्+तल्+घञ्।) उत्कटः। श्रेष्ठः। विकरालः। प्लवङ्गमः। इति मेदिनी॥
("ललदुत्तालवेतालतालवाद्यं विवेश तत्।
श्मशानं कृतान्तनोद्भिवासभवनोपमम्"॥
इति कथासरित्सागरे २५। १२६॥
"अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः
उत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः"।
इति उत्तरचरिते। २य अङ्के।) त्वरितः। इति हेमचन्द्रः॥

उत्तीर्णं, त्रि, (उत्+तॄ+क्त।) मुक्तम्। पारगतम्॥
("तुलोत्तीर्णस्यापि प्रकटितहताशेषतमसो
रवेस्तादृक्तेजो न हि भवति कन्यां गतवतः"।
इति पद्यसंग्रहे १९॥)

उत्तुङ्गः, त्रि, (उत् अतिशयेन तुङ्गः।) उच्चः। इति जटाधरः॥
("उत्तुङ्गशैलशिखरस्थितपादपाग्रा
काकः श्रमोऽपि फलमालभते सपक्षः"।
इति उद्भटः। उन्नतः। "पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति"। इति भर्तृहरिः १।७२॥)

उत्तुषः, पुं, (उद्गतस्तुषो धान्यत्वक् यस्मात्।) भ्रष्टधान्यम्। तत्पर्य्यायः। खाजिकः २ लाजाः ३। इति हारावली। खइ इति भाषा॥

उत्तेजना, स्त्री, (उत्+तिज्+णिच्+युच्।) प्रेरणा। व्यग्रकरणम्॥ (तीक्ष्णीकरणम्। यथा,
"आघट्टनोत्तेजनया मणीनाम्"। इति माघे।)

उत्तेजितं, क्ली, (उत्+तिज्+णिच्+क्त।) अश्वचतुर्थगतिः। सा च मध्यवेगेन या गतिः। तत्पर्य्यायः। रेचितम् २। इति हेमचन्द्रः॥ प्रेरिते त्रि॥

उत्तेरितं, क्ली, (उत्+तॄ+इतच्।) अश्वपञ्चमगतिः। तत्पर्य्यायः। उपकण्ठं २ आस्कन्दितकम् ३। इति हेमचन्द्रः॥ (तथा चोक्तं,—
"उत्तेरितोऽतिवेगान्धो न शृणोति न पश्यति"॥)

उत्तोलनं, क्ली, (उत्+तुल्+ल्युट्।) ऊर्द्धनयनम्। तोला। इति भाषा॥

उत्त्यक्तः, त्रि, (उत्+त्यज्+क्त।) परित्यक्तः। ऊर्द्धक्षिप्तः। विरक्तः॥

उत्त्रासः, पुं, (उत्+त्रस्+घञ्।) भयम्। इति शब्दरत्नावली॥

उत्थानं, क्ली, (उत्+स्था+ल्युट्।) सैन्यम्। युद्धम्। पौरुषम्। पुस्तकम्। उद्यमः। (यथा रामायणे ५।
"मम धर्म्मार्थमुत्थानं न कामक्रोधसंज्ञितम्"।) उद्गमः। (अभ्युदयः। यथा रघुवंशे। ६।३१।
"निदर्शयामास विशेषदृश्य-
मिन्दुं नवोत्थानमिवेन्दुमत्यै"॥)
हर्षः। वास्त्वन्तः। अङ्गनम्। चैत्यः। (धनार्ज्जननिमित्ता चेष्टा। यथा मनुः ९।२१५॥
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह।
न पुत्त्रभागं विषमं पिता दद्यात् कथञ्चन"॥)
मलोत्सर्गः। इति हेमचन्द्रः॥ तन्त्रम्। तत्तु स्वमण्डलम्। सैन्यं चिन्ता च। सन्निविष्टः। उपविष्टः। इत्यमरभरतौ॥ गात्रोत्तोलनम्। उठन इति भाषा। (यथा शाकुन्तले २य अङ्के। "मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः"।) यथा च,
"निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्"॥
इति तिथ्यादितत्त्वम्॥ (पुनर्जीवनम्। मरणानन्तरं पुनर्जीवनलाभः। यथा महाभारते।
"स चापि वरयामास पितुरुत्थानमात्मनः"॥)

उत्थानैकादशी, स्त्री, (उत्थानाय हरेः प्रबोधनाय या एकादशी। अस्यां भगवान् क्षीरोदशयानो नारायणः योगनिद्रां विहाय उत्तिष्ठति।) कार्त्तिकशुक्लैकादशी॥ अथ विष्णूत्थानम्। तत्र दिवसे रेवत्यन्तयुक्तायां द्वादश्याम्। रात्रौ रेवत्यन्तपादयोगे तु दिवातृतीयभागे रेवतीयुक्तद्वादश्याम्। द्वादश्यामुक्ताभावे एकादशीप्रभृतिपौर्णमास्यन्तान्यतमतिथौ रेवत्यन्तपादयोगे। तदभावे केवलायां द्वादश्यां सन्ध्यायां विष्णुं संपूज्य।
ॐ "महेन्द्ररुद्रैरभिनूयमानो
भवानृषिर्व्वन्दितवन्दनीयः।
प्राप्ता तवेयं किल कौमुदाख्या
जागृष्व जागृष्व च लोकनाथ॥
मेघा गता निर्म्मल एष चन्द्रः
शारद्यपुष्पाणि च लोकनाथ।
अहं ददानीति च पुण्यहेतो-
र्जागृष्व जागृष्व च लोकनाथ"॥
ततश्च।
"उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम्"॥
इति पठेत्। इति कृत्यतत्त्वम्॥

उत्थापनं, क्ली, (उत्+स्था+णिच्+ल्युट्।) उत्तोलनम्। उपस्थितीकरणम्॥
("किन्नु मे सुकृतं भूयात् भर्त्तुरुत्थापनं न वा"।
इति महाभारते १। आस्तीकपर्व्वणि। ४६।१७।)

उत्थितं, त्रि, (उत्+स्था+क्त।) वृद्धिमत्। प्रोद्यतं। उत्पन्नम्। इत्यमरमेदिनीकरौ॥ (कृतोत्थानम्।
"अर्द्धाचिता सत्वरमुत्थितायाः"।
इति कुमारे, ७।६१। रघुवंशे च ७।१०।
"शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ"।
इति मेघदूते। ११२। "न यावदेतावुदपश्यदुत्थितौ"। इति माघे। १।१५॥)

उत्थिताङ्गुलिः, पुं, (उत्थिता अङ्गुलयो यत्र।) चपेटः। विस्तृताङ्गुलिकरतलम्। इति शब्दचन्द्रिका। चापड़ इति भाषा॥

उत्पतः, पुं, (उत् ऊर्द्धं पतति गच्छति। उत्+पत्+अच्।) पक्षी। इति त्रिकाण्डशेषः॥

उत्पतनं, क्ली, (उ+पत्+ल्युट्।) उत्पत्तिः। ऊर्द्धगमनम्। इति मेदिनी॥
("अथोत्पतनमन्त्रं सा पठित्वा ससखीजना"।
इति कथासरित्सागरे॥ विंशतरङ्गे॥)

उत्पतिता, [ऋ] त्रि, (उत्+पत्+तृच्।) ऊर्द्धगमनशीलः। उपरिगमनकर्त्ता इत्यमरः॥

उत्पतिष्णुः, त्रि, (उत्+पत्+इष्णुच्।) ऊर्द्धगमनशीलः। तत्पर्य्यायः। उत्पतिता २। इत्यमरः॥
("ससङ्गुरश्चतुरश्चानामेलानामुत्पतिष्णवः"।
इति रघुः। ४। ४७। तथा पञ्चतन्त्रे। ३। ४१।
"मृगपतिरपि कोपात् सङ्कुचत्युत्पतिष्णुः"॥)

उत्पत्तिः, स्त्री, (उत्+पत्+क्तिन्।) उत्पतनम्। तत्पर्य्यायः। जनुः २ जननं ३ जन्म ४ जनिः ५ उद्भवः ६। इत्यमरः॥ संसारः ७ भवः ८ जातिः ९। इति जटाधरः॥ प्रभवः १० भावः ११ सम्भवः १२ जनूः १३। इति शब्दरत्नावली॥